# naTeshvarasahasranAmastotrasya uttarapIThikA

# નટેશ્વરસહસ્રનામસ્તોત્રસ્ય ઉત્તરપીઠિકા

## Document Information

Text title : naTeshauttarapIThikA

File name : naTeshauttarapIThikA.itx

Category : sahasranAma, shiva

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Latest update : November 5, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# નટેશ્વરસહસ્રનામસ્તોત્રસ્ય ઉત્તરપીઠિકા

શ્રીગણેશાય નમઃ ।

શ્રીચિદમ્બરનટેશ્વર સહસ્રનામસ્તોત્રસ્ય ઉત્તરપીઠિકા ॥

ઇતિ તે કથિતં દેવિ નટરાજસ્ય સુન્દરમ્ ।
નામ્નાં સહસ્રમત્યન્તં ગોપ્યં નેદં પ્રકાશયેત્ ॥ ૧॥

સર્વસિદ્ધિકરં પુણ્યં સર્વવિદ્યાવિવર્ધનમ્ ।
સમ્પદ્પ્રદમિદં નૃણાં સર્વાપદ્ઘ્નમઘાપહમ્ ॥ ૨॥

અભિચાર પ્રયોગાદિ મહાકૃત્ય નિવારણમ્ ।
અપસ્માર મહાવ્યાધિ જ્વરકુષ્ઠાદિ નાશનમ્ ॥ ૩॥

અત્યુત્પાદ ભયક્ષોભ ક્ષુદ્રશાન્તિદ કારણમ્ ।
કૂશ્માણ્ડ રુદ્ર વેતાલ શાકિન્યાદિ ભયાપહમ્ ॥ ૪॥

સ્મરણાદેવ જન્તૂનાં બ્રહ્મહત્યાદિ નાશનમ્ ।
અસ્માત્પરતરં સ્તોત્રં નાસ્તિ લોકત્રયેઽમ્બિકે ॥ ૫॥

એતન્નામ સહસ્રસ્ય પઠનાત્ સકૃદેવ હિ ।
મહાપાતકયુક્તોઽપિ શિવસાયુજ્યમાપ્નુયાત્ ॥ ૬॥

પ્રયોગલક્ષણં વક્ષ્યે શૃણુ શૈલસુતેઽધુના ।
પઞ્ચમ્યામથવાઽષ્ટમ્યાં દશમ્યાં વા વિશેષતઃ ॥ ૭॥

સ્નાત્વા શુભાસને સ્થિત્વા ધ્યાયન્ શ્રીનટનાયકમ્ ।
પ્રજપેત્દ્વાદશાવૃત્યા સર્વાન્ કામાન્ લભેન્નર। ॥ ૮॥

આર્દ્રાયાં પ્રાતરારભ્ય નટરાજસ્ય સન્નિધૌ ।
આસાયં પ્રજપેદેતત્ એવં સંવત્સરત્રયમ્ ॥ ૯॥

તસ્ય ભક્તસ્ય દેવેશો નટનં દર્શયેત્પ્રભુઃ ।
બિલ્વવૃક્ષસ્ય નિકટે ત્રિવારં પ્રજપેદિદમ્ ॥ ૧૦॥

ષડ્ભિર્માસૈર્મહૈશ્વર્યં લભતે ન ચિરાન્નરઃ ।
અનેન સ્તોત્રરાજેન મન્ત્રિતં ભસ્મધારયેત્ ॥ ૧૧॥

ભસ્માવલોકનાન્મૃત્યુર્વશ્યો ભવતિ તત્ક્ષણાત્ ।
સલિલં પ્રાશયેદ્ધીમાન્ મન્ત્રેણાનેન મન્ત્રિતમ્ ॥ ૧૨॥

સર્વવિદ્યામયો ભૂત્વા વ્યાકરોત્યશ્રુતાદિકમ્ ।
નાટકાદિ મહાગ્રન્થં કુરુતે નાત્ર સંશયઃ ॥ ૧૩॥

ચતુર્થ્યન્તં સમુચ્ચાર્યનામૈકૈકં તતો જપેત્ ।
પઞ્ચાક્ષરં તથા નામ્નાં સહસ્રં પ્રજપેત્ક્રમાત્ ॥ ૧૪॥

એવં ત્રિવારં માસાનામષ્ટાવિંશતિકે ગતે ।
નિગ્રહાનુગ્રહૌ કર્તું શક્તિરસ્યોપજાયતે ॥ ૧૫॥

નામ્નામાદૌ તથાન્તે ચ પઞ્ચાક્ષરમહામનુમ્ ।
જપ્ત્વા મધ્યસ્થિતં નામ નિર્મમોન્તં સદા સકૃત્ ॥ ૧૬॥

ચતુર્થ્યન્તં જપેદ્વિદ્વાન્ ત્રિવર્ષં ચ ત્રિમાસકૈઃ ।
અણિમાદિ મહાસિદ્ધિ રચિરાત્ પ્રાપ્નુયાદ્ધ્રુવમ્ ॥ ૧૭॥

સર્વેષ્વપિ ચ લોકેષુ સિદ્ધઃ સન્વિચરેન્નરઃ ।
લક્ષ્મીબીજ દ્વયક્ષિપ્તમાદ્યં તન્નામ યઃ શિવે ॥ ૧૮॥

વાઞ્છિતાં શ્રિયમાપ્નોતિ સત્યમુક્તં વરાનને ।
હલ્લેખામન્ત્ર સંયુક્તં પૂર્વવત્ સંયુતં જપેત્ ॥ ૧૯॥

યોગસિદ્ધિર્ભવેત્તસ્ય ત્રિચતુઃ પઞ્ચવત્સરૈઃ ।
કિમત્ર બહુનોક્તેન યાયા સિદ્ધિરભીપ્સિતા ॥ ૨૦॥

તાં તાં સિદ્ધિં લભેન્મર્ત્યઃ સત્યમેવ મયોદિતમ્ ।
કણ્ઠદઘ્નજલેસ્થિત્વા ત્રિવારં પ્રજપેદિદમ્ ॥ ૨૧॥

રિપૂનુચ્ચાટયેચ્છીઘ્રમેકેનૈવ દિનેન સઃ ।
દક્ષિણાભિમુખોભૂત્વા ધૃત્વાઽઽર્દ્રવસનં શુચિઃ ॥ ૨૨॥

શત્રુનામસમુચ્ચાર્ય મારયેતિપદાઙ્કિતમ્ ।
પઠેદિદં સ્તવં ક્રોધાત્ સપ્તકૃત્વસ્ત્રિભિર્દિનૈઃ ॥ ૨૩॥

સ રિપુર્મૃત્યુગેહસ્ય ધ્રુવમાતિથ્યભાગ્ભવેત્ ।

હરિદ્રયા નટાધીશં કૃત્વા પ્રાણાન્ પ્રતિષ્ઠિપેત્ ॥ ૨૪॥

પીતપુષ્પૈઃ સમભ્યર્ચ્ય સ્તોત્રમેતજ્જપેન્નરઃ ।
સ્તમ્ભયેત્સકલાન્લોકાન્ કિમિહક્ષુદ્રમાનુષાન્ ॥ ૨૫॥

આકર્ષણાય સર્વેષામુત્તરાભિમુખોજપેત્ ।
વાઞ્છિતાયોષિતસ્સર્વાસ્તથા લોકાન્તરસ્થિતાઃ ॥ ૨૬॥

યક્ષાશ્ચ કિન્નરાશ્ચાપિ રાજાનોવશમાપ્નુયુઃ ।
કુમ્ભસ્થિતં જલંસ્પૃષ્ટ્વા ત્રિવારં પ્રજપેદિદમ્ ॥ ૨૭॥

મહાગ્રહગણગ્રસ્તાન્ અભિષેકઞ્ચકારયેત્ ।
જલસ્પર્શનમાત્રેણમુચ્યતે ચ ગ્રહાદિભિઃ ॥ ૨૮॥

કિમત્ર બહુનોક્તેન સિદ્ધ્યન્ત્યખિલસિદ્ધયઃ ।
સાક્ષાન્નટેશ્વરો દેવો વશ્યો ભવતિ તત્ક્ષણાત્ ॥ ૨૯॥

(શૈલજે ॥ )
અસ્માત્પરતરાસિદ્ધિઃ કાવાસ્તિકથયપ્રિયે ।
નિષ્કામસ્યાચિરાદેવ બ્રહ્મજ્ઞાનમવાપ્યતે ॥ ૩૦॥

તસ્માત્સર્વપ્રયત્નેન યતિભિર્બ્રહ્મચારિભિઃ ।
વનસ્થૈશ્ચ ગૃહસ્થૈશ્ચ સર્વૈર્જપ્યં પ્રયત્નતઃ ॥ ૩૧॥

નિત્યકર્મવદેવેદં સ્તોત્રં જપ્યં સદાદરાત્ ।
બ્રહ્માદયોઽપિ યન્નામ પાઠસ્યૈવ પ્રસાદતઃ ॥ ૩૨॥

સૃષ્ટિસ્થિત્યન્તકર્તારો જગતાં ચિરજીવિનઃ ।
યદિદં મુનયઃ સર્વે હયગ્રીવાદયઃ પુરા ॥ ૩૩॥

પઠિત્વા પરમાં સિદ્ધિં પુનરાવૃત્તિવર્જિતામ્ ।
પ્રાપિરે તદિદં સ્તોત્રં પઠત્વમપિ શૈલજે ॥ ૩૪॥

અસ્માત્ પરતરં વેદ્યં નાસ્તિ સત્યં મયોદિતમ્ ।

॥ ઇત્યુત્તર પીઠિકા ॥

ઇત્યાકાશભૈરવકલ્પે પ્રત્યક્ષસિદ્ધિપ્રદે ઉમામહેશ્વરસંવાદે
પઞ્ચવિંશતિમૂર્તિપ્રકરણે તત્ત્વાતીત શ્રી ચિદમ્બર
નટેશ્વર સહસ્રનામસ્તોત્રમાલામહામનોપદશો
નામ એકોનષષ્ટિતમોઽધ્યાયઃ

॥ ૐ શિવમસ્તુ ॥

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan

The text follows after the Nateshasahasranamastotram given separately.

---

*naTeshvarasahasranAmastotrasya uttarapIThikA*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*